# छन्दः
# छन्दोमञ्जरीमवलम्ब्य

कौशिक-पात्रः
सहकारी अध्यापकः
संस्कृत-विभागस्य
शालतोड़ा नेताजी सेन्टिनारी कलेज इति महाविद्यालयस्य
शालतोड़ा, बॉकुड़ा, पश्चिमबङ्ग
इ-मेल- patrakousikjrf@gmail.com

# छन्दसः गगरुत्वम्

- छन्दो वेदस्य पञ्चमाङ्गमस्ति । वेदाः सन्ति छन्दोबद्धाः, अतः तेषामुच्चारणनिमित्ताय छन्दोज्ञानं नितरामपेक्षितम्।
- श्रुतिगतिनिरूपकस्य छन्दसो गमनानुकूलतदङ्गत्वमुच्यते पाणिनीयशिक्षायां छन्दः पादौ तु वेदस्य इत्यनेन ।
-

# शब्दार्थः

- छन्दशब्दः छद् इति धातुना निष्पन्नः।
- छन्दः' इत्येतस्य पदस्य व्युत्पत्तिरियम् – छन्दयति (पृणाति) इति छन्दो वा छन्दयति (आह्लादयति) इति छन्दः अथवा छन्द्यतेऽनेनेति छन्दः । छन्दांसिच्छादनाद् इत्येतद् यास्ककथनाद् वेदार्थवाचकं छन्दः इत्येतत्पदं छद् (छादने) धातोर्निष्पन्नम् । वेदावरणकारित्वात् छन्द इत्यस्य पदस्य युक्ततां दुर्गाचार्यः आह -

  यदेभिरात्मानमाच्छादयन् देवा मृत्योर्बिभ्यतः, तत् छन्दसां छन्दस्त्वम्॥'

# किं नाम छन्दः?

- निश्चितवर्णान् मात्राः वा पादं मत्वा रचितं वाक्यं वाक्यसमूहं वा छन्दः कथ्यते।
- पद्यरचनायाः शास्त्रस्य छन्दः इति नाम ।

# छन्दसः विभागाः

- वैदिकलौकिकभेदेन द्विविधस्य छन्दसो द्वितीये गणमात्राक्षरभेदेन पुनस्त्रैविध्यम् । तत्र गणच्छन्दः आर्यादिः । मात्राच्छन्दः वैताल्यादिः । अक्षरच्छन्दः श्र्यादिः ।त्रिष्वपि पुनस्त्रेधा समार्धसमविषमभेदेन विभागः । समे दण्डकसाधारणाभ्यां द्वैविध्यम् । इत्थं भेदोपभेदविशिष्टानां छन्दसां गुरुलघुभावव्यवस्थया सहासङ्ख्यप्रकाराः सम्भवन्ति ।

- सर्वप्रथमं छन्दसां भेदद्वयम्-

  लौकिकच्छन्दः

  वैदिकच्छन्दः।
- एषु छन्दस्सु अपि भेदाः सन्ति, ते एवं सन्ति
- वार्णिकच्छन्दः-यत्र वर्णानां गणनाऽऽधारेण छन्दसां निर्धारणं भवति तत्र वार्णिकच्छन्द भवति।
- मात्रिकच्छन्दः-यत्र मात्राणां गणनाऽऽधारेण छन्दसां निधारणं भवति तत्र मात्रिकच्छन्दः भवति।

**छन्दः**

- वार्णिकच्छन्दः (वृत्तम्) (वार्णिक छन्द)
  - समवृत्तम् (इन्द्रवज्रा)
  - विषमवृत्तम् (आपीडकलिका)
  - अर्द्धसमवृत्तम् (पुष्पिताग्रा)
- मात्रिकच्छन्दः (मात्रिक छद) (जाति)
  - आर्या

# पद्यं तस्य भेदाः

- पद्यं हि चतुष्पदी । तत्र चत्वार : पादाः वर्तन्ते।
- पद्यं द्विविधं वृत्तं जातिरिति । वस्तुत : छन्दसः एव वृत्तजातिभेदेन द्वैविध्यम ज्ञेयम् ।
- वृत्तम्-अक्षरैर्गणना यत्र तद वृत्तमिति कथ्यते । उक्तं गङ्गादासेन- ' वृत्तम् अक्षरसंख्यातम् ' इति।
- जातिः-मात्राभिर्गणना यत्र सा जातिरिति कथ्यते । उक्तं गङ्गादासेन- ' जातिर्मात्राकृता भवेत् ' इति ।

# मात्रा

- मात्राशब्देन कालपरिमाणं बोद्धव्यम् । उच्यते हि-

वामजानुनि तद्धस्तभ्रमणं यावता भवेत् ।
कालेन मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः ।।

मात्रा चतुर्विधा एकद्वित्रि - अर्धभेदात् । तथा हि-

एकमात्रो तवे ह्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रिकम् ।।

ह्रस्वस्वरः एकमात्राविशिष्टः , दीर्घस्वर : द्विमात्राविशिष्टः ,
प्लुतस्वर : त्रिमात्रविशिष्ट व्यञ्जनवर्णः अर्धमात्राविशिष्टो भवति।

# त्रिविधवृत्तानि

- वृत्तं त्रिविधं - समवृत्तम् , अर्धसमवृत्तम् , विषमवृत्तं चेति।

१.समवृत्तम्-यस्य पद्यस्य चतुर्णां पादानाम अक्षराणि समानि एकछन्दविशिष्टानि तत्र समवृत्तम् बोद्धव्यम् । यथा मालिनी , वसन्ततिलकम् इत्यादि।

२.अर्धसमवृत्तम्-यस्य पद्यस्य पादानां मध्ये प्रथमतृतीययोः अक्षरसमत्वं तथा द्वितीयचतुर्थयोश्च अक्षरसाम्यं तत्र अर्धसमवृत्तं भवति । यथा वियोगिनी वृत्तम् ।

३.विषमवृत्तम्-यस्य पद्यस्य चत्वारः पादाः असमानाक्षरविशिष्टाः तत्र विषमवृत्तं बोद्धव्यम् । यथा उद्गतावृतम् ॥

# गणाः

- छन्दःशास्त्रे छन्दसां निर्णायकानि दश अक्षराणि स्वीक्रियन्ते । ते गणा उच्यन्ते । एकस्मिन् गणे अक्षरत्रयं वर्तते । गगणे ल गणे च एकाक्षरता अस्ति । ते हि गणा : म , न , भ , य , ज . र , स , त , ग , ल इति । एतेषां गणानां मिश्रणेन एकैकं छन्दः उद्भवति । यथा मालिनी छन्दसिननमयय इति पञ्चगणा वर्तन्ते ।

# गणानां स्वरूपाणि

- अष्टगणाः त्र्यक्षरविशिष्टाः । गगणलगणौ एकाक्षरविशिष्टौ । गणानां स्वरूपाणि प्राचीनः निरूपितानि । यथा-

"मस्त्रिगुरु खिलघुश्च नकारो

भादिगुरुः पुनरादिलघुर्यः ।

जो गुरुमध्यगतो रलमध्यः

सोऽन्त्यगुरु : कथितोऽन्त्यलघुस्तः ।।

गुरुरेको गकारस्तु लकारो लघुरेककः ।"

म गण : त्रिगुरु : ( --- ) , नगणः त्रिलघुः (UUU) ,भगण : आदिगुरुः (-UU)

# लघुगुरुविचारः

- लघुगुरुव्यवस्थाः-छन्दसां प्रयोगः मूलतः स्वरवर्णाधारितः अस्ति। छन्दसां दृष्ट्या वर्णाः द्विप्रकारकाः
- लघुः,गुरुः
- सामान्यतः ह्रस्वः स्वरः लघुः भवति। अस्यकृते 'U' इति चिह्न निर्धारितम्। ह्रस्व-स्वराः पञ्च सन्तिः अ, इ, उ, ऋ, लु।
- दीर्घस्वरः गुरुः भवति। अस्य कृते '-' इति चिह्न निर्धारितम्। दीर्घ-स्वराः अष्ट सन्ति-आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ। लघुगुरुव्यवस्थायां केचन विशेषनियमाः एवं सन्ति

# गुरुवर्णाः

"सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत्।
वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा॥"

अर्थात्-

१.अनुस्वारेण युक्ताः यथा- अं, कम्, खम् इत्यादयः गुरुः भवन्ति।।

२. विसर्गान्ताः यथा- अः, कः, खः इत्यादयः गुरुः भवन्ति।

३. संयुक्तवर्णात् पूर्वः वर्णः गुरुः भवति।

४. चरणस्य अन्तिमः वर्णः यदि लघु अस्ति तर्हि आवश्यकतानुसारतः विकल्पेन गुरुः स्वीकर्तुं शक्यते।।

# यतिः

- पद्यानां कथनप्रसङ्गे जिह्वायाः विश्रान्तिः यत्र अपेक्षिता भवति तत्स्थानमेव यतिस्थानमिति कथ्यते। गङ्गादासेन छन्दोमञ्जर्यामुक्तम्-

"यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते।
सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया।।"

- यत्र लक्षणेषु साङ्केतिकशब्दाः न सन्ति अर्थात् यतिर्निष्टा नास्ति तत्र पादान्ते यतिश्चिन्तनीया।

# धन्यवादः

